# आरती

## श्रीगणेशअथर्वशीर्षाचे आरतीत रूपांतर

वास्तविक मूळ मंत्रात्मक असलेल्या स्तोत्राचे असे रूपांतर करणे कितपत योग्य ?

पण 'ज्या ज्या आम्हापाशी होतील शक्ती। तेणें हे श्रीपती अलंकारू ॥'' हा तुकारामांचा भाव

असल्यावर हे रूपांतर प्रत्यक्ष श्रीगणेशाला पण मोदकच व्हावे.

ॐ

''श्रीमन्महागणाधिपतये नमः''

श्रीमन्मंगलमूर्ते वन्दे जगदात्मन्

सिद्धिविनायक भवतात् नित्यं नः शरणम् ॥धृ.॥

त्वं प्रत्यक्षं तत्त्वं त्वं साक्षाद् आत्मा

कर्ता धर्ता हर्ता त्वमहो ते प्रभुता ।

योगिजनानां ध्येयं भक्तानां भाग्यम्

विदुषां विद्वन् वेद्यं कर्मठजनकाम्यम् ॥१ ॥

ब्रह्म त्वं प्रत्यक्षं सच्चित्सुखरूपम्

ज्ञानं विज्ञानं च त्वदीयपररूपम्।

वाक्पदचतुष्टयात्मन् शक्तित्रितयात्मन्

मूलाधारस्थायिन् नमनं ते भगवन् ॥२ ॥

कालत्रयमतिशयिता त्रिगुणानतिगंता

देहत्रयातियाता त्वं जगतां पाता ।

ब्रह्मा रुद्रो वायुःसूर्योऽग्निर्विष्णुः

इंद्रः तथैव चंद्रः त्वमसि प्रभविष्णुः ॥३॥

ॐ स्वर् भुवोऽसि भूःत्वम सर्वं ब्रह्म त्वम्

भ्वादिनभोऽन्तं पंचकमप्यसि निखिलं त्वम् ।

जगदिदमभवत् त्वत्तःत्वयि च प्रत्येति

त्वत्तःतिष्ठति चान्ते विलयं त्वयि याति ॥४॥

पश्चात् पुरतोऽधस्तात् ऊर्ध्वादुत्तरतः

दक्षिणतश्च समंतात् अव मां सर्वतः ।

ॐ गँ मनुस्वरूपं जपामि ते नित्यम्

अबोधमव मां विघ्नात् दुरितात् ते शिष्यम् ॥५॥

त्वामेकदंत वेत्तुं तदुपर्यवबोध्दुम्

हे वक्रतुंड दंतिन् चोदय नः सततम्

भक्तानुकंपिनं त्वां अच्युतमविकारम्

हस्तचतुष्टयसहितं रक्तांशुकरामम् ॥६॥

आरक्तगंधलिप्तं चायुधबिभ्राणम्

रक्तैः पुष्पैः पूजितमारवुध्वजवहनम् ।

प्रकृतेः पुरुषात् च परं सृष्ट्यादौ संतम्

देवं जगतः कारणमेकं दंतैकम् ॥७॥

एवं ध्यायति भक्तो यः त्वां निरन्तरम्

भवति स योगी ह्यवितथमाथर्वणवाक्यम् ।

व्रातपते लंबोदर नमनं गणपतये

शिवसुत विघ्नविनाशिन् प्रमथानां पतये ॥८॥

श्रीवरदमूर्तये ते नमनं साष्टांगम्

नम एकदंत तुभ्यं सप्रश्रयमनिशम् ।

श्रीमन्मंगलमूर्ते वन्दे जगदात्मन्

सिद्धिविनायक भवतात् नित्यं नः शरणम् ॥९॥

*

गणपत्यथर्वशीर्षं योऽधीते सांगम्

पुमर्थजातं विन्दति पुरुषो निर्बाधम् ।

निर्विघ्नं निरतिशयं पुमर्थसहितसुखम्

गणपत्यथर्वशीर्षाध्ययनाद् ब्रह्मत्वम् ॥१॥

गणपतिमभिषिंचति यःसूक्तेनाऽविरतम्

भवति स भक्तो वाग्मी लभते वाग्विभवम् ।

जपति च तिथौ चतुर्थ्यां योऽनश्नन् सूक्तम्

अधिगच्छति स चतुर्दशविद्यासंघातम् ॥२॥

दूर्वांकुरैश्च यजनात् वैश्रवणोपमता

लाजैस्तथा हि यजनात् सयशोधीमत्ता ।

मोदकसहस्त्रयजनात् वांछितफललब्धिः

साज्यसमिद्भिर्यजनात् समस्तसंसिध्दिः ॥३॥

अष्टब्राह्मणशिष्यान् सूक्तं वेदयिता

सूर्योपमवर्चस्वी भवति ग्राहयिता।

सूर्यग्रहणे मूर्तेर्निकटं वा नद्याम्

सिद्धिं गच्छति मंत्रो जपतामनवद्याम् ॥४॥

यो वेदेदं नितरां जानाति स सकलम्

न हि विघ्नदोषपापैः तस्यायुर्विकलम्।

श्रीमन् मंगलमूर्ते वन्दे जगदात्मन्

सिध्दिविनायक भवतात् नित्यं नः शरणम् ॥५॥

***

## श्रीगणेशाच्या प्रचलित बारा नावांनी युक्त अशी ही आरती

ॐ

''श्रीगणेशाय नमः''

जय जय गणेश देवा वरदा विघ्नेशा ।

उमेशतनया वंदन तुजला प्रमथेशा ॥धृ.॥

गणपति विकट विनायक अगाध तव महिमा

ऋद्धी सिद्धी देसी भक्तांना चरमा ॥१ ॥

लंबोदर गजवक्त्रा विघ्नेन्द्रा चरणीं ।

नमितां तवैकदंता वाहे पुण्यधुनी ॥२ ॥

बा भालचंद्र देवा धूम्रोपमवर्णा ।

कृष्णेक्षणपिंगाक्षा गजानना शरणा ॥३ ॥

पत्री पुष्पे दूर्वा आमोदद्रव्ये ।

व्यंकटतुंडा मोदक समर्पितो भावें ॥४ ॥

जोडुनि हस्तक मस्तक नमवी पदपद्मीं ।

अंती विनती बापा ने मज तव धामीं ॥५ ॥

जय जय गणेश देवा वरदा विघ्नेशा ।

उमेशतनया वंदन तुजला प्रमथेशा ॥धृ.॥

इति श्रीगजाननार्पणमस्तु ।

***

## श्रीमद्भागवतारतिः

जय जय भगवन् वन्दे श्रीमद्भागवतम् ।
कलिमलमथनं सद्यो मोक्षप्रदमतुलम् ॥धृ. ॥
वन्दे परमानन्दं भागवताकारम् ।
व्यासमुखाविर्भूतं वाचां रससारम् ॥
सकलपुराणवरिष्ठं वैष्णवजनरिक्थम् ।
चिरवांछितसुखकुंभं व्यासेनावाप्तम् ॥१ ॥

ब्रह्म सनातनमक्षरमव्ययमतिरूपम् ।
धत्ते सुखदं रूपं वाङ्मयमतिमधुरम् ॥
विशदं वेदरहस्यं भक्तानां तीर्थम्।
सुधियां जिज्ञासूनां उत्सवमुत्साहम् ॥२॥
विरतःशुकमुनिरपि यत् रतिमकरोत् वक्तुम् ।
धत्ते नारदमुनिरपि लिप्सां यत् श्रोतुम् ॥
श्रवणीयं तन्नित्यं रसिकाः पठनीयम् ।
भूयो भूयो वन्दे श्रीमद्भागवतम् ॥३॥

***

***(Composed By: Vaidya Shriniwas P. Hirlekar)***